श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला–२१

# वाक्यार्थज्योतिः

# Vākyārthajyotiḥ

अङ्कः - 3 वर्षम् :- २०१७ - १८

प्रधानसम्पादकः

**प्रो. गोपबन्धुमिश्रः**

कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादकौ

**डॉ. डी. एम्. मोकरिया**, सहायकाचार्यः

**डॉ. बी. उमामहेश्वरी**, सहायिकाचार्या

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी–वेरावलम्

प्रकाशकः -

**डॉ. दशरथजादवः**
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाष : ०२८७६-२४४५३२, फेक्स: २४४४१७
www.sssu.ac.in

**सहसम्पादकः समन्वयकश्च -**

डॉ. कार्तिकपण्डया
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© *Shree Somnath Sanskrit University, Veraval - 2020*

Note : The statements and views expressed by the authors of articles in this conference proceeding are their own and not necessarily of the editors. The responsibility of the facts stated opinions expressed, or conclusions reached, is entirely that of the author of respective research articles and that Shree Somnath Sanskrit University accepts no responsibility for them.

**संस्करणम्** प्रथमम्

**वर्षम्** मार्च २०२०

**प्रतिकृतय** ३५०

**ISBN** - 978-93-83097-42-5

**मूल्यम्** - रु. १८०/-

**मुद्रकः** - **जलाराम ग्राफिक्स एन्ड ओफसेट**
परमहंस एपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

# धर्मशास्त्रानुसारेण विवाहप्रथा

डॉ. महेन्द्रकुमारः बै...
आचार्यः, साहित्यविभाग...
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
वेरावलम्।

धर्मशास्त्रेषु विवाहस्य सुप्रतिष्ठितं गौरवान्वितं च रूपं समुपलभ्यते। कन्यां पत्नीत्वेन गृह्णन् पतिः कथयति। यदहं सौभाग्यलाभाय त्वत्पाणिं गृह्णामि। त्वमपि पतिरूपेण मया सह जरावस्थाम् अवाप्नुयाः। सृष्ट्वा अन्यैर्देवैश्च गृहस्थाश्रममनुष्ठातुं मह्यं प्रदत्ताऽसि। उक्तं च-

"ॐ गृभ्णामि ते सौभगत्वाय हस्तं
मया पत्या जरदृष्टिर्यथासः।
भगो अर्यमा सविता पुरन्धि-
र्मह्यं त्वादुर्गार्हपत्याय देवाः" ॥[1]

दम्पती तयोरेव एकहृदयत्वं प्रतिपादयन्तौ देवान् उपस्थितान् सभ्यांश्च प्रत्याययतः यत् तयोर्हृदये जलमिव सम्मिलिते स्तः। यथा प्राणाः प्रेयांसो भवन्ति तद्वत् तावपि परस्परं प्रसादयुक्तो स्थास्यतः। जगद्धारक इव तौ अन्योन्यं धारयिष्यतः। श्रोतृभिः सार्धं वक्तुः प्रीतिरिव तौ पारस्परिकम् अविच्छिन्नं प्रेम धारयिष्यतः-

"ॐ समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ।
सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ"[2]॥

अथर्ववेदेऽपि सुखदाता, पवित्रा, अन्तःकरणयुक्ता इति सम्बोधनं कृत्वा पत्नी विषये कथितमस्ति यत् -

"अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः।
वीरसूर्देवृकामा स्योना शं नो भव द्विपदेशं चतुष्पदे[3]॥

---

[1] ऋग्वेदे- १०.८५.५६।
[2] ऋग्वेदे-१०.८५.४७।
[3] ऋग्वेदः १०-८५-४४।

**विवाहस्य महत्त्वम्-**

वैदिकसाहित्ये विवाहोऽप्येको यज्ञ एव मन्यते। तदभावे मानवोऽयज्ञियो यज्ञहीनो वाऽभिधीयते। तैत्तिरीयब्राह्मणे स्पष्टतया लिखितम् - "अयज्ञियो वा एष योऽपत्नीकः इति"। ऋणत्रयान्मुक्त्यर्थं विवाहमवश्यमेव विधीयते। यथा-

चतुर्थमायुषो भागं वसित्वाद्यं गुरोः कुले।
द्वितीयमायुषो भागं कृतदारो गृहे वसेत्॥
वनेषु च विहृत्यैवं तृतीयं भागमायुषः।
चतुर्थमायुषो भागं त्यक्त्वा सङ्गान् परिव्रजेत्॥[5]

वसिष्ठधर्मसूत्रेऽपि आश्रमोऽयं भूरि भूरि प्रशंसितो वर्तते। यथा-

गृहस्थ एव यजते, गृहस्थस्तप्यते तपः।
चतुर्णामाश्रमाणान्तु गृहस्थस्तु विशिस्यते॥
यथा नदीनदाः सर्वे समुद्रे यान्ति संस्थितिम्।
तथा गृहस्थमाश्रित्य सर्वे जीवन्ति जन्तवः॥[6]

धर्मशास्त्रानुसारेण पुराणेष्वपि प्रथमे वयसि ब्रह्मचर्यपालनपूर्वकं विधिवद् विद्याध्ययनं विधाय गृहस्थाश्रमे प्रवेष्टुकामनया यथाशक्तिं गुरुवे दक्षिणां दत्त्वा तदनुमत्या ब्रह्मचर्यव्रतं समाप्य सत्कुलोत्पन्नया सवर्णया भ्रातृमत्या कन्यया सह विधिवत् पाणिग्रहणं कृत्वा सांसारिकव्यावहारिकानुष्ठानपूर्वकं सुखेन समयं यापनायादेशो दत्तोऽस्ति। स्मृतिषु विवाहोऽष्टविधः प्रोक्तो तथैव विष्णुपुराणेऽपि विवाहोऽष्टविधो निर्दिष्टोऽस्ति। यथा-

ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽसुरः।
गान्धर्वराक्षसो चान्यौ पैशाचश्चाष्टमो मतः॥[7]

---

[4] तै.ब्रा.-२-२-२-१३। तैयबा
[5] मनुस्मृतौ-४-१.२।
[6] वसिष्ठ धर्मसूत्रम्-८/१३/१४.१६।

पौराणिकयुगे श्रीरामादीनामेकपत्नीव्रतस्य श्लाघ्यत्वे[6] सत्यपि बहुविवाहस्यापि प्रथायाः प्रचलनमासीत्। सृष्टेरादिपुरुषस्य स्वायम्भुवमनोः द्वितीयपुत्रस्य उत्थानपादस्य द्वे भार्ये आस्तां सुनीतिः सुरुचिश्च। दक्षदुहितृषु कश्यपस्य १३, धर्मस्य १४, सोमस्य २७, अरिष्टनेमेः ४, बहुपुत्रस्य २, अङ्गिरसस्य २, कृशाश्वस्य च पत्नीद्वयमासीत्। राजाचित्रकेतोः अनेकाः स्त्रिय आसन्। राज्ञः दशरथस्य कौसल्या, सुमित्रा, कैकेयीति तिस्रः स्त्रियोऽभूवन्। वसुदेवस्य देवकी-रोहिण्यादयोऽष्टो भार्या बभूवुः। पौराणिकदृष्ट्या भगवतः श्रीकृष्णस्य रुक्मिणी-सत्यभामादीनां १६१०८ पत्नीनां चर्चा विद्यते। महाभारतकाले विचित्रवीर्यस्य द्वे-अम्बाम्बिके, पाण्डोरपि द्वे-कुन्तीमाद्र्यौ, अर्जुनस्य द्रौपदी-उलूपी-चित्राङ्गदा-सुभद्राचेति चतस्रः पत्न्य आसन्। एवं पुराणकाले एकविवाहस्य तथा अनेकविवाहस्य च प्रथा प्रचलितासीत्। क्वचित् ब्राह्मणानां क्षत्रियकन्याभिः सह तथा क्षत्रियाणां ब्राह्मणकन्याभिश्च सह विवाहो भवति स्म। धर्मानुकूल व्यावहारिक बन्धनं पवित्रतमं मन्यतेस्म।

वैदिकयुगात् परवर्तिनि साहित्ये विशिष्य महाभारते यत्र तत्र केचन प्रसङ्गा उपलभ्यन्ते, यानवलम्ब्य नैकैर्विद्वद्भिः परामृष्टं यद् विवाहसंस्कारस्य प्रतिष्ठापनात् प्राग् विमुक्तः कामाचारः; प्रवर्तमान आसीत्। आदिपर्वणि कुन्तीं नियोगाय अभिप्रेरयन् पाण्डुः पुराकाले कुरुवंशकाले चापि स्त्रीणां कामचारतां वर्णायति। यथा-

अनावृत्ताः किल पुरा स्त्रिय आसन् वरानने।
कामाचारविहारिण्यः स्वतन्त्राश्चारुहासिनि ॥
तासां व्युच्चरमाणानां कौमारात् सुभगे पतीन्।
नाऽधर्मोऽभूद्वरारोहे स हि धर्मः पुराऽभवत्।
उत्तरेषु च रम्भोरु कुरुष्वद्यापि वर्तते ॥

कर्णपर्वणि शल्यवचनैरवमानितः कर्णो मद्रदेशेऽपि स्त्रीणां कामचारतां वर्णयति। यथा-

वासांस्युत्सृज्य नृत्यन्ति स्त्रियो या मद्यमोहिताः।

[7] विष्णुपुराणम् – ३.१.२४। एवं मनुस्मृतिः – ३-२१

मैथुनेऽसंयताश्चापि यथाकामचराश्च ताः ॥[8]

उपर्युक्ता इमे प्रसङ्गाः कदाचिद् अंशतः सत्याः स्युः, किन्तु कथमपि ते कामचाराद् विवाहसंस्कारस्योद्भवं न साधयन्ति। वेदव्यासो वाल्मीकिश्च बहुषु स्थलेषु प्रत्यपादयतां यत् विवाहः सामान्यः स्वाभाविकश्च संस्कारो यः खलु सुसंस्कृते सभ्ये च समाजे लभ्यते[9]। यो हि समाजो नियमरहितोऽव्यवस्थितोऽराजकश्च स्यात् , तत्रैव विवाहस्य मर्यादा न संभव्यते -

"न विवाहाः समाजो वा यदि राजा न पालयेत्।[10]

विवाहानन्तरं स्वसौन्दर्यं सुशीलतादिभिरनैकैराकर्षकैर्गुणैः पत्नी पतिमनुकूलयतिस्म, यतोहि पत्नीसाहचर्यं धार्मिकेण भावेन प्रतिष्ठितमनिवार्यञ्चासीत्। अत एव पतिरपि लोकपरलोकयोः सर्वत्र स्वांविशिष्टां पत्नीमेवाभिकामयते स्म। तदनुरूपा पत्नी अपि धार्मिकभावनाभि प्रेरिता सती पत्युः सार्वत्रिकं कल्याणं सर्वथा चेष्टतेस्म। जन्मान्तरेऽपि तमेव पतिं कामयतेस्म। बृहदारण्यकोपनिषदि निरूपितं यत् सृष्टेरुपक्रमे पुरुषाकार आत्मैव आसीत्। स सम्यग् निरीक्ष्य आत्मभिन्नं कमपि पदार्थान्तरं नावालोकयत्। स एकाकी नारभत्। अत एव पुरुषोऽद्यापेकाकी न रमते। स द्वितीयमैच्छत्। अतः स आत्मानं द्विधा व्यभजत्। इत्थं तौ पतिपत्नी चाभवताम्–

आत्मैवेदमग्र आसीत्पुरुषविधः: ।
सोऽनुवीक्ष्य नाऽन्यदात्मनोऽपश्यत् । सोऽहमस्मीत्यग्रे।
.....सवैनैवरेमे ।
तस्मादेकाकी न रमते , स द्वितीयमैच्छत् ।
स हैतावानास यथा स्त्रीपुमांसौ सम्परिष्वक्तौ ।
स इममेवात्मानं द्वेधाऽपातयत् ।
ततः पतिश्च पत्नी चाभवताम् ॥ [11]

---

[8] महाभारते- ८-२७-८५।

[9] हिन्दुविवाह मीमांसा,पृष्ठ-२०।

[10] महाभारते- १२.६८.२२।

[11] बृहदारण्यकोपनिषदि- १-४-१।३

उपनिषदः कथनमिदं स्फुटं प्रतिपादयति यन्मनुष्यः समाजाधिष्ठितत्वादेव विवाहं कृत्वा परिवारमुपकल्प्य प्रतिवर्णितं वेदेष्वपि विवाहसंस्कारस्य प्रतिष्ठापनं रूपमेव लभ्यते। युवयुवत्यौ परिणेतृचयने स्वतन्त्रौ आस्ताम्। विवाहात् परं पतिगृहमभ्युगता पत्नी गृहस्वामिनी अभवत्। वधूः सुभगा सुपुत्रा च स्यादिति पुरोहितस्तान् आशीर्भिरभिनन्दति।- यथा-

आत्मन्वत्युर्वरा नारीयमागन्
तस्यां नरो वपत बीजमस्याम् ।
सा वः प्रजां जनयद् वक्षजाभ्यो विभ्रती
दुग्धमृषभस्य रेतः ॥[12]

वरोऽपि कामयते यत् तस्य वधूपुत्रवती स्यात्, पारस्परिकेण सद्भावेन प्रीत्या च तौ शतवर्षाणि जीवेताम् –

प्रबुंध्यस्व सुबुधाबुध्यमानादीर्घायुत्वायशतशारदाय ।
गृहान् गच्छ गृहपत्नी यथासौ दीर्घं त आयुः सविता कृणोतु ॥[13]

भारतीयैः मनीषिभिः सुविचारितायाम्, अपि च संस्कृतवाङ्मये प्रारम्भत एव निरूपितायां विवाहपद्धत्यामेव स तदीयम् अमरत्वाभिलाषं चरितार्थी कर्तुमर्हति। स एनां विवाहपद्धतिमतिरिच्य अमरत्वलाभाय अन्यं कमपि सुगमं सरलं सुन्दरं प्रशस्तं चोपायं नालभत। शास्त्राणि समुद्घोषयन्ति यत् व्यूढः सन् मानव औरससन्तत्या माध्यमेन अमरत्वं लभतेतराम्।

पौराणिकयुगे सामजिकक्षेत्रे नारीणां महत्त्वपूर्णं स्थानमासीत्। अतश्चतुर्षु आश्रमेषु गृहस्थाश्रमः प्रमुखः कथितो यतः स सर्वेषामाधारोऽस्ति।

---

[12] अथर्ववेदे-१४.१.१४।

[13] अथर्ववेदे-१४.१.७५।

## सन्दर्भ सूचिः


(१) ऋग्वेदः- भाष्यकारः सायणः, आनन्दाश्रम मुद्रवालय पुना, प्रथम संस्करण-१९४२।

(२) अथर्ववेदः- भाष्यकारः सायणः, चौखम्बा ओरियन्टालिया वाराणसी- प्रथम संस्करण-१९६४।

(३) मनुस्मृति- पं गङ्गाधर झा, परिमल पब्लिकेशन, दिल्ली-२००४।

(४) विष्णुमहापुराणम् प्रो. थानेशचन्द्र उत्प्रेति, परिमल पब्लिकेशन, दिल्ली-२००३।

(५) महाभारत M.N.DUTT- परिमल पब्लिकेशन, दिल्ली-१९९१।

(६) तैतिरीयब्राह्मण- भाष्यकारः सायणः, गणेश उमाकान्त, न्यु भारतीय बुक कोर्पोरेशन-२०१२, दिल्ली।

(७) बृहदारण्यकोपनिषदभाष्यम्, डॉ- आनन्दतीर्थाचार्यः, पूर्णप्रज्ञ-विद्यापीठम्-२००६, बङ्गलुरु।